
Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:9(3), September 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

# छान्दोग्योपनिषदि आत्मैकत्वविज्ञानम्

**डा. रा. सुब्रह्मण्य भिडे,**
**सहायाचार्यः,**
**श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः, तिरुपतिः**

सहस्रवर्त्मा सामवेदः इति ख्यातस्य सामवेदस्य संहिता-ब्राह्मणादि-ग्रन्थसहितं सहस्रं शाखाः पूर्वमासन्निति, इदानीं तु शाखात्रयमेवास्तीति सर्वे विद्वांसः जानन्त्येव । किन्तु तादृशस्य सहस्रशाखात्मक-सामवेदस्य बह्वीनां शाखानां लुप्तत्वात् , तत्सम्बद्धस्य अपरिमित-ग्रन्थराशेः नष्टात् अपरिमितज्ञानराशिरहिताः इदानीन्तनाः वयं, भविष्यत्कालिकाः प्रजाश्च भूयो भूयः प्रणष्टाः।

एवमेतादृङ्महत्वभूतस्य सामवेदस्य सहस्रशाखासु जैमिनि-राणायनी-कौथुम्याख्य-अवशिष्टशाखात्रयसम्बद्धे ईश-केन-कठ-प्रश्नादिगणितासु दशसु मुख्योपनिषत्सु केन-छान्दोग्याख्ये द्वे मुख्ये उपनिषदे भवतः।

एतासु ईशादिदशोपनिषत्सु छान्दोग्योपनिषत् बृहत्तरा विराजते । ब्रह्मसूत्रभाष्येऽपि अस्याः उपनिषदः बहुत्र बहूनां वाक्यानां विचारितत्वात् अस्याः उपनिषदः स्थानम् अतीव महदिति विज्ञायते ।

इयमुपनिषत् **’ओमित्येतदक्षरमुद्गीथमुपासीत’** (छां.१.१.१) इत्यारभ्य, **’तद्धैतद्ब्रह्मा प्रजापतय उवाच ..... न च पुनरावर्तते न च पुनरावर्तते’** (छां.८.१५.१) इति पर्यन्तम् , अष्टसु अध्यायेषु विभक्ता सती, प्रत्येकमध्याये अनेकखण्डिकायुक्ता तत्वविचारार्थं बहुविस्तृतरूपेण जैव-पारमात्मिकादीनि नैकानि तत्त्वानि विचारयति ।

तत्र प्रथमाध्याये १३ खण्डिकासु साम्नाम् अवयवानाम् उद्गीथ-प्रस्ताव-प्रतिहाराणामुपासनं, द्वितीयाध्याये साम्नां भक्तीनां गायत्रादिसाम्नां च उपासनं, तृतीयाध्याये आदित्योपासनं, शाण्डिल्यविद्या, पुत्रस्य आयुषे दीर्घजीवनाय च उपासनम् , आदित्यब्रह्मो-पासनम् चतुर्थाध्याये संवर्गविद्या, षोडशकलविद्या, उपकोसलविद्या, पञ्चमाध्याये प्राणविद्या, पञ्चाग्निविद्या, वैश्वानरविद्या, षष्ठाध्याये आत्मैकत्वज्ञानोपदेशः, अद्वितीयात् सतः, सृष्टिकथनं, सुषुप्तिविचारेण जीवस्य सत्स्वरूपनिश्चयः, सप्तमाध्याये नामब्रह्मोपसना, भूमविद्या, अष्टमाध्याये दहरोपासनाविचारः, अवस्थात्रयनिरूपणेन आत्मतत्त्वनिर्धारणम्, इतीमे विचाराः विमृष्टाः।

पूर्वोक्तेषु बहुषु विषयेषु सत्स्वपि तत्वविचारे आत्मैकत्वज्ञानस्य मुख्यतमत्वात् इमं विचारं छान्दोग्यश्रुतिः कथमुपदिशतीति विमृशामः।

अयम् आत्मैकत्वज्ञानविचारः छान्दोग्ये षष्ठाध्याये महता विस्तरेण उपदिश्यते । यथा- **श्वेतकेतुर्हारुणेय आस ....** (छां.६.१.१) इत्यारभ्य, **स यथा तत्र नादाहयेतैतदात्म्यमिदꣳ सर्वम्** (छां.६.१६.३) इतिपर्यन्तं षोडशखण्डिकासु आत्मैकत्वज्ञानम् बोध्यते ।

तत्र आदौ अरुणेः अपत्यं श्वेतकेतुः आसीत्। तं पिता अवदत् । श्वेतकेतो ! ’ब्रह्मचर्यं वस’ इति । सः श्वेतकेतुः द्वादशवर्षं ब्रह्मचर्यम् उषित्वा वेदानधीत्य, महामनाः अनूचानमानी अप्रणतस्वभावः सन् गृहमाजगाम । तदा पिता, हे श्वेतकेतो, त्वम् आत्मानं अन्यैः सह असमं मन्ये । येन श्रुतेन अश्रुतमपि अन्यत् श्रुतं भवति, अमतं मतम् , (अतर्कितं तर्कितं) अविज्ञातं विज्ञातं भवति तत् आत्मतत्त्वं जानासि वा इति अपृच्छत् । तदा श्वेतकेतुः कथं भवति स आदेशः ? नाहं जाने इत्यवोचत् ।

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:9(3), September 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

तदानीं पिता वदति - सोम्य, यथा कुम्भादिकारणभूतेन एकेन विज्ञातेन मृत्पिण्डेन तद्विकारजातं सर्वमन्यत् मृन्मयं विज्ञातं भवति, यथा वा सुवर्णपिण्डेन तद्विकारजातं मुकुटकेयूरादि सर्वं विज्ञातं भवति, यथा वा कृष्णायसपिण्डेन सर्वं तद्विकारजातं विज्ञातं भवति तथा स उपदेशो भवति इति पिता अरुणिः पुत्रं श्वेतकेतुमुपदिदेश । तदा श्वेतकेतुः भवानेव मह्यं 'येन ज्ञातेन मे सर्वज्ञत्वं भवति' तत्कथयतु इत्यवदत् ।

तदा अरुणिः - **सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्। तद्धैक आहुरसदेवेदमग्र आसीदेकमेवाद्वितीयं तस्मादसतः सज्जायत ।** (छां.६.२.१) इति उपदेष्टुमारभे ।

अत्र सन्नाम किमिति प्रथमं विचार्यते - 'सत्' नाम अस्तितामात्रं वस्तु, सूक्ष्मं निर्विशेषं सर्वगतं निरञ्जनं निरवयवं यदेकं विज्ञानं सर्ववेदान्तेभ्यः अवगम्यते तत् इति ।

हे सौम्य । इदं जगत् नामरूपक्रियावत् यत् विकृतमुपलभ्यते तत् पूर्वं सदेव आसीत् । तर्हि इदानीं तत् 'सत्'न वा ? इति पृष्टे, इदानीमपि इदं सदेव, किन्तु नामरूपविशेषवत् इदंशब्दबुद्धिविषयकं च इति, इदं भवति । उत्पत्तेः प्राक् केवलं 'सच्छब्दबुद्धिमात्रगम्यमेव' इति, **'सदेवेदमग्र आसीत्'** इत्यवधार्यते । यथा सुषुप्तकाले इव उत्पत्तेः प्राक् नामवत् रूपवत् वा इदमिति ग्रहीतुं न हि शक्यम् । यथा सुषुप्तादुत्थितः स्वस्य सत्त्वमात्रमवगच्छति 'सुषुप्ते सन्मात्रमेव केवलं वस्तु' इति तथा प्रागुत्पत्तेरित्यभिप्रायः। यथा लोके पूर्वाह्णे घटादिसिसृक्षुणा कुलालेन मृत्पिण्डं प्रसारितम् उपलभ्य, ग्रामान्तरं गत्वा प्रत्यागतः अपराह्णे तत्रैव घटशरावादि अनेकभेदभिन्नं कार्यमुपलभ्य, इदं घटशरावादि पूर्वाह्णे केवलं मृदेव आसीदिति वदति, तथैव इहाप्युच्यते 'सदेवेदमग्र आसीदि'ति । 'सत् एकम् अद्वितीयम्' इत्युक्तम् । 'स्वकार्यपतितम् अन्यन्नास्ती'ति एकमेवेत्युच्यते । अद्वितीयं नाम यथा मृदः, मृद्व्यतिरेकेण अन्यत् घटाद्याकारेण परिणमयितृ कुलालादिनिमित्तकारणं दृष्टम्, तथा, सद्व्यतिरेकेण सतः सहकारिकारणं द्वितीयं वस्त्वन्तरं प्राप्तं प्रतिषिध्यते अद्वितीयमिति । नास्य द्वितीयं वस्त्वन्तरं विद्यत इत्यद्वितीयम् ।

प्रथमखण्डिकायां - **तद्धैक आहुरसदेवेदमग्र आसीदेकमेवाद्वितीयं तस्मादसतः सज्जायत** (छां.६.२.१) इति, यत् एकपक्षत्वेन यदुपन्यस्तं तत् द्वितीयखण्डिकायां अनूद्य, - **"कुतस्तु खलु सोम्यैवꣳ स्यादिति होवाच कथमसतः सज्जायेतेति । सत्त्वेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्"।** (छां.६.२.१) **('कथमसतः सज्जायेत')** इति पृष्ट्वा, तन्मतं निराकृत्य निर्णयं वदति - **सत्त्वेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्** इति द्रढयति श्रुतिः।

एवञ्च एतदनन्तरं - **तदैक्षत बहु स्यां प्र जायेयेति तत्तेजोऽसृजत । तत्तेज ऐक्षत बहु स्यां प्र जायेयेति तदपोऽसृजत । ता आप ऐक्षन्त बह्व्यः स्याम प्र जायेमहीति ता अन्नमसृजन्त ...** (छां.६.२.३-४) इत्यादिवाक्यैः सतः, तेजसः अपाम् अन्नस्य च सृष्टिः कथिता ।

अत्र सत् ईक्षित्वा तेजः असृजत इत्युक्तम् । अत्र विचारः - ननु तैत्तिरीये **तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः** (तै.उ.२.१) इति आत्मनः आकाशः, आकाशाद्वायुः, ततः तृतीयं तेजः श्रुतम् । अत्र तु कथं प्राथम्येन उच्यते ? तस्मादेव सतः प्राथम्येन तेजः सृज्यते, तत एव च प्राथम्येन आकाशः सृज्यते इति विरुद्धम् । इति ।

नैष दोषः। आकाश-वायुसर्गानन्तरं तत् सत् 'तेजोऽसृजत्' इति श्रत्यन्तरबलात् कल्पयितुं शक्यते । अथ वा अत्र सृष्टिक्रमः अविवक्षितः। इदं सर्वं सत्कार्यम् , अतः सदेकमेवाद्वितीयम् इत्येतत् विवक्ष्यते । अत एव पूर्वं मृदादिदृष्टान्तो दत्तः। अथ वा अग्रे अस्मिन्नेव ग्रन्थे त्रिवृत्करणस्य विवक्षितत्वात् अत्र ग्रन्थे तेजोऽबन्नानामेव सृष्टिमाचष्टे श्रुतिः ।

एवं च आत्मैकत्वविज्ञानोपदेशे सत् एव सर्वमभवदिति कथनक्रमे तेजोबन्नानां त्रिवृत्करणं उपदेक्ष्यन्ती श्रुतिः आदौ, एषां भूतानां अण्डजं जीवजं उद्भिज्जमिति त्रीण्येव बीजानि भवन्ति (छां.६.३.१) इत्युक्त्वा, अनन्तरं सदेव - **सेयं देवतैक्षत**

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:9(3), September 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

**हन्ताहमिमास्तिस्रो देवता अनेन जीवेनाऽऽत्मनानुप्रविश्य नामरूपे व्याकरवाणीति** (छां.६.३.२) सदाख्या तेजोबन्नानां योनिः प्रकृता देवता, इमाः तेजआद्याः तिस्रो देवताः 'अनेन जीवेन' इति स्वबुद्विस्थं पूर्वसृष्ट्यनुभूत-प्राणधारणम् आत्मानमेव स्मरन्ती, वदति - 'अनेन जीवेन आत्मना' प्राणधारणकर्तात्मना इति ।

अत्र **'आत्मना'** इति वचनात् 'स्वात्मनः अव्यतिरिक्तेन चैतन्यस्वरूपतया अविशिष्टेन' (समानरूपेण) इत्येतद्दर्शयति । अनुप्रविश्य, तेजोऽबन्नभूत-मात्रासंसर्गेण लब्धविशेषविज्ञाना सती **'असौ नामाऽयम्' 'इदंरूपः'** इति नाम च रूपं च विस्पष्टम् अकरवाणि इति ।

अत्र भाष्यकारैः एवं विचार्यते - असंसारिण्याः सर्वज्ञायाः देवतायाः, बुद्धिपूर्वकम् अनेक-अनर्थाश्रयं देहम् अनुप्रविश्य दुःखमनुभविष्यामि इति सङ्कल्पनम् अनुप्रवेशश्च युक्तं न भवति ननु ?

सत्यमेव न युक्तं, यदि स्वेनैव अविकृतेन रूपेण 'अनुप्रविशेयं' 'दुःखमनुभवेयम्' इति संकल्पितवती स्यात् । न त्वेवम् । तर्हि 'अनेन जीवेनाऽऽत्मनानुप्रविश्य' इति कथम् ? इति।

जीवो हि नाम बुद्ध्यादि-भूतमात्रासंसर्गजनितः, आदर्शे प्रविष्टः पुरुषप्रतिबिम्ब इव, जलादिषु चन्द्रसूर्यादीनां प्रतिबिम्ब इव देवतायाः आभासमात्रं भवति ।

अचिन्त्यानन्तशक्तिमत्याः देवतायाः बुद्ध्यादिसम्बन्धः चैतन्याभासः। देवतास्वरूप-विवेक-अग्रहणनिमित्तः सुखी, दुःखी, मूढः, इत्यादि-अनेकविकल्पप्रत्ययहेतुः। छायामात्रेण जीवरूपेण अनुप्रविष्टत्वात् , देवता दैहिकैः सुखदुःखादिभिः न सम्बद्ध्यते । यथा पुरुषः आदर्शे, यथा च आदित्यादयः उदकादिषु छायामात्रेण अनुप्रविष्टाः आदर्शस्य उदकादीनां च दोषैः न सम्बध्यन्ते तद्वत् देवतापि न सम्बध्यते । अत्र श्रुतिप्रमाणमेवं भवति - **सूर्यो यथा सर्वलोकस्य चक्षुः न लिप्यते चाक्षुषैर्बाह्यदोषैः। एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः** ।(क. उ.१.३.१) इति।

एवमुपनिषदि अनुप्रवेशमुक्त्वा ततः नामरूपव्याकरणार्थं 'तेजोबन्नानां तिसृणां देवतानां एकैकां त्रिवृतं त्रिवृतं करवाणी'ति ईक्षितवती, इति इदं श्रुतिवाक्यं ब्रवीति - **तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति सेयं देवता इमास्तिस्त्रो देवता अनेनैव जीवेनाऽऽत्मनानुप्रविश्य नामरूपे व्याकरोत्** ।(छां.६.३.३) इति ।

एवं सा देवता अनुप्रविश्य 'स्वात्मावस्थे बीजभूते अव्याकृते नामरूपे व्याकरवाणी'ति ईक्षित्वा, 'तासां तिसृणां देवतानां एकैकां त्रिवृतं त्रिवृतं करवाणि' इत्यध्यायत। अत्र एकैकस्याः त्रिवृत्करणे एकैकस्याः प्राधान्यं इतरयोः द्वयोर्द्वयोः गुणभावः। अन्यथा रज्वाः इव एकमेव त्रिवृत्करणं स्यात् , न तु तिसृणां पृथक् पृथक् त्रिवृत्करणम् इति भवति । एवं कृते, 'तेज इदम्' 'इमा आपः' 'इदमन्न'मिति तेजोऽबन्नानां पृथक् नामप्रत्ययलाभः स्यात् । पृथक् नामप्रत्ययलाभे सति देवतानां सम्यग्व्यवहारस्य सिद्धिः प्रयोजनं स्यात् । एवम् ईक्षित्वा यथोक्तेन जीवेनात्मना सूर्यबिम्बवत् अन्तःप्रविश्य, प्रथमं वैराजं पिण्डं, (देहं) देवादीनां च पिण्डान् अनुप्रविश्य यथासङ्कल्पं नामरूपे व्याकरोत् 'असौ नामाऽयम्' 'इदंरूप' इति ।

इदं त्रिवृत्करणं बाह्याध्यात्मिकभेदेन द्विधा वदति श्रुतिः। तत्रादौ त्रिवृत्करणस्य बाह्यम् उदाहरणम् एवमुच्यते । तत्र प्रथमा खण्डिका एवं भवति - **यदग्ने रोहितꣳ रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागादग्नेरग्नित्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम्** (छां.६.४.१) इति ।

अग्नेः यत् त्रिवृत्कृतस्य रोहितं रूपं लोके प्रसिद्धं तत् अत्रिवृत्कृतस्य तेजसः रूपम् । एवमेव अग्नेः शुक्लं रूपं तदपां, यत् कृष्णं रूपं तदन्नस्य इति उदाहरणं दीयते ।


Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:9(3), September 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

एवमेव अनन्तरखण्डिकासु, तेजोवैविध्यभूतानाम् आदित्यस्य, चन्द्रमसः, विद्युतः अपि उदाहरणानि दत्तानि - **यदादित्यस्य रोहितꣳ रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागादादित्यादादित्यत्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् ।**

**यच्चन्द्रमसो रोहितꣳ रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागाच्चन्द्राच्चन्द्रत्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् ।**

**यद्विद्युतो रोहितꣳ रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागाद्विद्युतो विद्युत्त्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् ।** (छां.६.४.२-४) इति ।

अत्र विचारः - त्रिवृत्कृतस्य तेजसः उदाहरणकथनात् पूर्वं **"यथा तु खलु सोम्येमास्तिस्रो देवतास्त्रिवृत्त्रिवृदेकैका भवति** (छां.६.३.४) इत्युक्त्या, तेजसः एव, अग्न्यादिभिः त्रिवृत्करणं दर्शितम् । अपाम् अन्नस्य च उदाहरणं न दर्शितमिति । अत्र उत्तरम् - नैष दोषः। अपाम् अन्नस्य च उदाहरणानि एवमेव द्रष्टव्यानि इति श्रुतिर्मन्यते । तेजसः उदाहरणं तु उपलक्षणार्थं दर्शितं रूपवत्वात् स्पष्टार्थत्वोपपत्तेश्च ।

**यदि सर्वं जगत् त्रिवृत्कृतमिति भवति, अतः, श्रुत्या 'अग्नेः अग्नित्वम् अपगतम्' 'वाचारम्भणं विकारो नामधेयम्' , 'अग्निर्नाम विकारः, नाममात्रम्' 'त्रीणि रूपाणीत्येव सत्यम्'** (छा.६.४.१) **इति, अग्नेः अग्नित्वम् अपागात् , तथैव जगतः जगत्वमपि अपागात् । यथा - अन्नस्य अपां शुङ्गत्वात् आप एव सत्यम् । अन्नम् वाचारम्भणमात्रम् । तथा अपामपि तेजःशुङ्गत्वात् तेज एव सत्यम् , आपः वाचारम्भणमात्रम् । तथा तेजसोऽपि सतः शुङ्गत्वात् सदित्येव सत्यम् , तेजः वाचारम्भणमात्रम् ।** इत्येषोऽर्थः अत्र विवक्षितः।

एवं बाह्यत्रिवृत्करणस्य उपदेशानन्तरं - **यथा नु खलु सोम्य इमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति** (छा.६.४.७) इति आध्यात्मिकत्रिवृत्करणं विजानीहि इति प्रतिज्ञाय, **अन्नमशितं त्रेधा विधीयते …** (छा.६.५.१) इत्यादिना उपदिशति श्रुतिः । तत्रादौ खण्डिका एवं भवन्ति -

**अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत्पुरीषं भवति यो मध्यमस्तन्माꣳसं योऽणिष्ठं तन्मनः।**

**आपः पीतास्त्रेधा विधीयन्ते तासां यः स्थविष्ठो धातुस्तन्मूत्रं भवति यो मध्यमस्तल्लोहितं योऽणिष्ठः स प्राणः।**

**तेजोऽशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तदस्थि भवति यो मध्यमः स मज्जा योऽणिष्ठः सा वाक् ।** (छां.६.५.१-३) इति।

जाठराग्निना पच्यमानस्य अन्नस्य स्थूलांशः पुरीषं, मध्यमांशः मांसम्, अत्यन्तसूक्ष्मांशः मनो भवति । एवमेव पीतानामपां स्थूलांशः मूत्रं, मध्यमांशः रक्तम् , सूक्ष्मांशः प्राणो भवति । तथा भक्षितस्य तैलघृतादितेजसः स्थूलांशः अस्थि, मध्यमांशः मज्जा, सूक्ष्मांशः वाक् भवति ।

एवं आध्यात्मिक-त्रिवृत्करणमुक्त्वा - **अन्नमयꣳ हि सोम्य मनः, आपोमयः प्राणः, तेजोमयी वागिति** (छा.६.५.४) श्रुतिवाक्येन मनःप्राणवाचः अन्न-अप् -तेजोमय्यः इत्युच्यन्ते ।

अत उक्तत्रिवृत्करणविचारे आक्षेपपरिहारौ एवं भवतः - ननु केवलान्नभक्षिणः आखुप्रभृतयः प्राणिनः वाग्मिनः (शब्दवन्तः) प्राणवन्तः, तथा अम्मात्रभक्ष्याः मीनमकरप्रभृतयः मनस्विनः वाग्मिनश्च । तथा स्नेहपानामपि प्राणत्वं मनस्वित्वं च अनुमेयम् । तत्र कथम् अन्नमयं हि सोम्य मनः इत्याद्युच्यते ? इति ।

नैष दोषः, सर्वस्य त्रिवृत्कृतत्वात् , सर्वत्र सर्वस्य उपपत्तिर्भवति । न हि अत्रिवृत्कृतं अन्नं कश्चिदपि नाश्नाति खलु । आपः अपि अत्रिवृत्कृताः न पीयन्ते, तेजो वा अत्रिवृत्कृतं नाश्नाति इति।


Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:9(3), September 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

एवं श्वेतकेतुः आत्मैकत्वविज्ञाने तेजोबन्नानां सतः कार्यत्वं, त्रिवृत्करणज्ञानेन 'सर्वम् एकमेवे'ति विज्ञाय, पुनरपि **'भूय एव मा भगवान् विज्ञापयतु'** (छां.६.५.४) इति अस्मिन्नेव विचारे पुन: विस्पष्टज्ञानार्थं विज्ञातुमिच्छति ।

ततः श्रुतिः **'दध्नः सोम्य मथ्यमानस्य ... '** (छां.६.६.१-४) इत्यादिना, अन्नादीनां सूक्ष्मांशाः मनआदयः कथं भवन्तीत्यत्र दृष्टान्तं ददाति -

**दध्नः सोम्य मथ्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति तत्सर्पिर्भवति । एवमेव खलु सोम्यान्नस्याश्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति तन्मनो भवति । अपाः सोम्य पीयमानानां योऽणिमा स ऊर्ध्वः समुदीषति स प्राणो भवति । तेजः सोम्याश्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति सा वाग्भवति ।** (छां.६.६.१-४) इति ।

यथा मथ्यमानस्य दध्नः अणुभावः (सूक्ष्यांशः) सम्भूय ऊर्ध्वः नवनीतभावेन समुदीषति (उपरि गच्छति) तत्सर्पिर्भवति (नवनीतं भवति)। तथैव अश्यमानस्य अन्नस्य सूक्ष्मांशः ऊर्ध्वः समुदीषति तन्मनो भवति । तथैव पीयमानानाम् अपां सूक्ष्मांश: ऊर्ध्वः समुदीषति स प्राणो भवति । एवम् अश्यमानस्य तेजसः सूक्ष्मांशः ऊर्ध्वः समुदीषति सा वाक् भवति । इति।

एवमुक्त्वा श्रुतिः पुनः, **अन्नमयः हि सोम्य मनः ...** इति (छां.६.५.४) पूर्वोक्तं वाक्यं पुनरुक्त्वा उपसंहार्य, 'मनआदयः अन्नादिमयाः' इति पूर्वोक्तं विषयं दृढीकरोति ।

एवं बाह्य-आध्यात्मिकत्रिवृत्करणोपदेशानन्तरं - मनसः अन्नमयत्वविचारे इतोऽपि सम्यज्ज्ञानार्थं षोडशकलस्य पुरुषस्य उदाहरणं दीयते - **षोडशकलः सौम्य पुरुषः** (छां.६.७.१) इत्यादिना ।

तत्र सारः एवं भवति - श्वेतकेतुना **'भूय एव मा भगवान् विज्ञापयतु ... '** (छां.६.६.५) इति पृष्टः पिता अरुणिः एवं वदति - हे सोम्य ! पुरुषः षोडशकलः। इमं विषयं त्वं प्रत्यक्षीकर्तुमिच्छसि चेत् पञ्चदश दिनानि मा भुङ्क्ष्व । किन्तु अपः पिब । यतः अपः पिबतः तव प्राणः न विच्छेत्स्यते इति ।

एवं पित्रा उक्तः श्वेतकेतुः मनसः अन्नमयत्वं प्रत्यक्षीकर्तुम् इच्छन् पञ्चदश दिनानि अशनं न कृतवान् । षोडशे दिने पितरमुपसृत्य, किं ब्रवीमि भोः? इति अपृच्छत् । तदा पित्रा 'ऋचः यजूंषि सामानि वद' इत्युक्तः श्वेतकेतुः 'ऋगादीनि मम मनसि न दृश्यन्ते' इत्यवदत् ।

तदा अरुणिः हे सोम्य ! यथा लोके (इन्धनैरुपचितस्य) महत्परिमाणस्य अग्नेः, शान्तस्य अवशिष्टेन खद्योतमात्रेण एकेन अङ्गारेण तत्परिमाणात् ईषदपि बहु न दहेत् (दहयेत) एवमेव तव अन्नोपचितानां षोडशकलानां मध्ये अवशिष्टया एकया कलया इदानीम् ऋगादीन् न ज्ञायसे । मम वाचं श्रृणु । प्रथमं भुङ्क्ष्व, अनन्तरं अशेषं विज्ञास्यसि इत्यवदत् ।

ततः तं भुक्तवन्तं, ऋगादीनि ज्ञातवन्तं पुनः पिता उवाच - हे सोभ्य ! महत्परिमाणस्य अग्नेः शान्तस्य परिशिष्टं खद्योतमात्रम् एकमङ्गारं तृणैरुपसमाधाय वर्धयेच्चेत् , तेन प्रवर्धितेन अङ्गारेण पूर्वपरिमाणादपि बहु दहेत् (दहयेत), एवमेव भुक्तेन तव अन्नेन, सामर्थ्यरूपाणां षोडश-अन्नकलानां मध्ये, पञ्चदश दिनानि अभुक्तवतः तव, एका क्षीणा अवशिष्टा या कला आसीत् सा वर्धिता । वर्धितया कलया इदानीं वेदान् ज्ञायसे इत्यवोचत् । ततः स श्वेतकेतुः मनःप्राणवाचः अन्न-अप्-तेजोमय्यः इति सम्यक् ज्ञातवान् इति खण्डिकासारः।

एवं श्रुतिः अरुणि-श्वेतकेतुसंवादमाध्यमेन 'सर्वं सदेव' इति आत्मैकत्वज्ञानं बोधयति।

तथा चास्मिन् प्रबन्धे छान्दोग्योपनिषदः परिचयः, तद्गतविषयपरामर्शः, श्वेतकेतोः ब्रह्मचर्यम् , पितुः प्रश्नः, पित्रा उपदेशरूपाः 'सर्वं सदेव' 'सता एव नामरूपवतः जगतः व्याकरणम्' 'यथा कारणात् कार्यम् अभिन्नं तथा जगदपि सद्भिन्नं न' इत्येवमादिविचाराः, श्रुत्युक्त-सृष्टिकथन-बाह्य-आध्यात्मिकत्रिवृत्करण-उपदेशदिशा, शङ्करभगवत्पादभाष्यावलोक-नेन,

कर्नाटकप्रदेशस्य होळेनरसीपुरस्थैः ब्रह्मीभूतैः श्रीसच्चिदानन्देन्द्रसरस्वती-स्वामिभिः कृतव्याख्यानसाहाय्येन च यथामति विचारिताः। अनेन सद्विचारेण भगवान् प्रीतो भवत्वित्याशास्य विरम्यते विस्तरात् ।

**परामृष्टग्रन्थाः -**


**1. छान्दोग्योपनिषत्**

**Editor & Translator**
**Sri sachchidaanandenra sarasvati swami**
**II Edition – 1986,**
**Pub : Adhyatma Prakasha Karyalaya**
**Holenaraseepur, Hasan Dist. K.A.State – 573211**

**2. कठोपनिषत्**

**Editor & Translator**
**Sri sachchidaanandenra sarasvati swami**
**6th Edition – 2002,**
**Pub : Adhyatma Prakasha Karyalaya**
**Holenaraseepur, Hasan Dist. K.A.State – 573211**

**3. तैत्तिरीयोपनिषत्**

**Editor & Translator**
**Sri sachchidaanandenra sarasvati swami**
**III Edition – 1998,**
**Pub : Adhyatma Prakasha Karyalaya**
**Holenaraseepur, Hasan Dist. K.A.State – 573211**